दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् अधिकज्येष्ठकृष्णषष्ठी
ज्येष्ठ 23 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-224 | 1 | जून 06, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 प्रधानमन्त्री नरेन्द्रमोदी गुजरातराज्ये अष्टादश-सहस्राष्टशत-कोटिरूप्यकाधिक मूल्यानां मार्ग-विद्युतः तथा औद्योगिक-विकास-परियोजनानां शुभारम्भं कृतवान्

3 मादकद्रव्यव्यापारे संलिप्तानां १२३ शासकीय- कर्मचारिणां विरुद्धं कार्यविधिः, १७४ 'चिट्टा' तस्कराः कारागारं प्रेषिताः- मुख्यमन्त्री सुक्खुः

5 संस्कृतविश्वविद्यालये अभवत् वृक्षारोपणम् विश्वपर्यावरणदिवसे कुलपतेः नेतृत्वे सञ्चालितम् अभियानम्

## नेपालदेशस्य विदेशमन्त्री शिशिरखनालः त्रिदिवसीयां भारतयात्रायां दिल्लीं सम्प्राप्तोत्



**हिमसंस्कृतवार्ता।** नेपालदेशस्य विदेशमन्त्री शिशिरखनालः गतदिने आरभ्य त्रिदिवसीयस्यां भारतयात्रायां दिल्ली सम्प्राप्नोत् । सः भारतस्य विदेशमन्त्रिणः डॉ. एस्. जयशङ्करस्य निमन्त्रणेन भारतम् आगच्छति। यात्राकाले नवदिल्लीत्यत्र उभयोः मन्त्रिणोः मध्ये द्विपक्षीया वार्ता भविष्यति। नेपालस्य विदेशमन्त्रालयस्य अनुसारं व्यापारः, निवेशः, सम्पर्कविस्तारः, ऊर्जाक्षेत्रे सहयोगः तथा जनसम्बन्ध-सुदृढीकरणम् चेत्यादिषु विषयेषु चर्चा भविष्यति। एषा यात्रा भारत-नेपालयोः मैत्रीपूर्ण-सम्बन्धान् तथा परस्परसहयोगं अधिकं सुदृढं करिष्यतीति ।

## केन्द्रीयगृहमन्त्री अमित शाहः

### त्रिपुराराज्यस्य लङ्कामुरा-सीम्नि सीम-सुरक्षाबलस्य सैन्यबलम् सम्बोधितवान्

हिमसंस्कृतवार्ता। केन्द्रीयगृहमन्त्री अमित शाहः त्रिपुराराज्यस्य लङ्कामुरा-सीम्नि सीम-सुरक्षाबलस्य सैन्यबलम् सम्बोधयन् व्यापिकं सीम-सुरक्षां प्रति दृष्टिकोणं प्रस्तुतवान्। सीमसुरक्षायाः महत्त्वं प्रतिपादयन् गृहमन्त्री उक्तवान् यत् प्रशासनं त्रिपुरा, पश्चिमबङ्ग बिहार चेत्येतेषु सीमवर्तिषु क्षेत्रेषु अवैध जनसांख्यिकीय परिवर्तनानां निरोधाय दृढसंकल्पितम् अस्ति। श्रीशाहः सीम-प्रबन्धनस्य सुदृढीकरणाय स्थानीय-नागरिक-प्रशासनेन सह उन्नत प्रौद्योगिक्याः एकीकरणं कर्तुं "स्मार्ट-बॉर्डर-रणनीतिम्" अपि उद्घाटितवान्।

### एशिया-कप् हॉकी प्रतियोगितायाः उपान्त्यस्पर्धायां भारतेन-पाकिस्तान दलम् पञ्च त्रि अंक अंतरालेन पराजितम्

पुरुषाणाम् अष्टादश एशिया-कप् हॉकी प्रतियोगितायाः उपान्त्यस्पर्धायां भारतेन-पाकिस्तान दलम् पञ्च त्रि अंक अंतरालेन पराजितम्। अपरतः महिलानाम् आ-अष्टादश एशिया कप् प्रतियोगितायाः उपान्त्यस्पर्धायां चीनदेशेन भारतीयदलम् पराजितम् ।

# विश्वपर्यावरणदिवसे प्रशासनेन दिल्ल्यां अष्टादश नमो आक्सीजन पार्क इति उद्यानानि उद्घाटितानि



**हिमसंस्कृतवार्ता।** पृथिव्यां जीवनस्य संरक्षणाय पर्यावरण-जागरूकतायाश्च संवर्धनार्थं संयुक्त-राष्ट्रपर्यावरण-कार्यक्रमस्य अन्तर्गतं विश्वपर्यावरण-दिवसः प्रतिवर्षं आयोज्यते। प्रशासनेन दिल्ल्यां अष्टादश नमो आक्सीजन पार्क इति उद्यानानि उद्घाटितानि । अस्मिन् अवसरे उपराष्ट्रपतिः सी.पी. राधाकृष्णन, प्रधानमन्त्री नरेन्द्र मोदी, गृहमन्त्री अमित शाहः, रक्षामन्त्री राजनाथ सिंहः च देशवासिभ्यः शुभाशंसाः प्रदत्तवन्तः। प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् "मातुः नाम्ना एकः वृक्षः" इति अभियानं वनक्षेत्रवृद्धौ महत्त्वपूर्णं योगदानं दत्तवत्। तेन उक्तं यत् अयं दिवसः पर्यावरणसंरक्षणम् सततविकासम् च प्रति अस्माकं प्रतिबद्धतायाः प्रतीकः अस्ति। उपराष्ट्रपतिना उक्तं यत् भारतीयसंस्कृतिः मानवम् प्रकृत्या सह सामञ्जस्येन जीवनं यापयितुं शिक्षयति ।

**डॉ. एल. मुरुगनःनवदिल्लीनगरस्य आल इंडिया रेडियो परिसरे "एक पेड़ माँ के नाम" अभियानस्य भागरूपेण एकं वृक्षं रोपितवान्**

सूचनाप्रसारणराज्यमन्त्री डॉ. एल. मुरुगनःनवदिल्लीनगरस्य आल इंडिया रेडियो परिसरे "एक पेड़ माँ के नाम" अभियानस्य भागरूपेण एकं वृक्षं रोपितवान्। डॉ. मुरुगनः नागरिकेभ्यः आह्वानं कृतवान् यत् ते पर्यावरणस्य रक्षणस्य प्रतिज्ञां कुर्वन्तु। सः जलसंरक्षणस्य, वृक्षारोपणस्य, वृक्षाणां रक्षणस्य, संरक्षणस्य च आवश्यकतायाः उपरि बलं दत्तवान् ।

# भारतीय-रिजर्व-बैङ्केन स्वस्य नवीन-मौद्रिक नीतिसमीक्षायां प्रमुखकुसीददराः यथावत् स्थापिताः

हिमसंस्कृतवार्ता। भारतीय-रिजर्व-बैङ्केन स्वस्य नवीन-मौद्रिक नीतिसमीक्षायां प्रमुखकुसीददराः यथावत् स्थापिताः। बैङ्कस्य गवर्नरः संजयमल्होत्रा अवदत् यत् रेपो दरः पञ्च दशमलव द्वि पञ्च प्रतिशतं यावत् एव स्थास्यति। बैङ्कानां कृते रिजर्व-बैङ्कात् ऋणग्रहणदरे कश्चन् परिवर्तनम् न कृतम्। तथापि, रिजर्व बैङ्केन चालित-वित्तवर्षस्य आर्थिकवृद्ध्यनुमानं षड् दशमलव नव प्रतिशतात् न्यूनीकृत्य षड् दशमलव षड् प्रतिशतं कृतम्। अपरञ्च मुद्रास्फीत्याः अनुमानं वर्धापयित्वा पञ्च दशमलव एक प्रतिशतं निर्धारितम्। परिवर्तमानानाम् आर्थिकपरिस्थितीनां दृष्ट्या एषः निर्णयः समुचितः इति बैङ्केन उक्तम्।

## केन्द्रसर्वकारेण विदेशी-संस्थागत निवेशकेभ्यः करेषु महत् शैथिल्यम् प्रदत्तम्

हिमसंस्कृतवार्ता। विदेशी-निवेशकेभ्यः करमुक्तिः, भारते च निवेशवृद्धेः प्रोत्साहनम्। केन्द्रसर्वकारेण विदेशी-संस्थागत-निवेशकेभ्यः महत् शैथिल्यम् प्रदत्तम् । सर्वकारीय प्रतिभूतिषु निवेशात् प्राप्तेः पूंजीलाभे तथा कुसीदरूपेणआये सम्पूर्णकरमुक्तिः प्रदत्ता। एषा व्यवस्था अस्य वर्षस्य एप्रिल-मासस्य प्रथमदिनात् प्रभाविनी भविष्यति। एतदर्थं प्रशासनेन षड्विंशत्युत्तर द्विसहस्रतमवर्षस्य आयकर-संशोधनाध्यादेशः प्रकाशितः। सर्वकारस्य मते, अनेन निर्णयेन विदेशी निवेशकेभ्यः भारते अधिकनिवेशस्य प्रोत्साहनं भविष्यति। तेन सर्वकारीयप्रतिभूतिषु निवेशः वर्धिष्यते। अर्थव्यवस्थायाः सुदृढीकरणे तथा विकासपरियोजनानां वित्तसङ्ग्रहे च साहाय्यं भविष्यति।

# सुभाषितम्

**सुवर्णपुष्पां पृथिवीं, चिन्वन्ति पुरुषास्त्रयः।**
**शूरश्च कृतविद्यश्च, यस्य जानाति सेवितुम्।।**

भावार्थः:- शूरवीर, विद्वान तथा अपने जीवन का पूरा आनन्द उठाने में समर्थ, इन तीन प्रकार के व्यक्तियों के लिए ही यह पृथिवी एक सोने से बने हुए और मूल्यवान सुवर्णपुष्प के समान आकर्षक और आनन्ददायक है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## आगामिनोः द्वि त्रि दिवसयोः मध्ये दक्षिण-पश्चिम प्रावृटः आगमनाय परिस्थितयः अनुकूलाः सन्ति

हिमसंस्कृतवार्ता। भारतीय ऋतु विज्ञानविभागेन उक्तम् यत् आगामिनोः द्वि त्रि दिवसयोः मध्ये मध्य-अरबसागरस्य केषुचित् अधिकेषु भागेषु, समग्रे गोवाप्रदेशे, महाराष्ट्रस्य, आन्ध्रप्रदेशस्य, कर्नाटकस्य च केषुचित् भागेषु, तमिलनाडुराज्यस्य अवशिष्टेषु भागेषु तथा पूर्वोत्तरराज्यानां केषुचित् भागेषु दक्षिण-पश्चिम प्रावृटः आगमनाय परिस्थितयः अनुकूलाः सन्ति। अनेन विभागेन केरल, कर्णाटक, तमिलनाडु-पुदुच्चेरी चेत्येतेषु राज्येषु केषुचित् स्थानेषु अतिवृष्टेः सम्भावना अपि प्रकटिता।


# हिमाचल-मन्त्रिमण्डले शीघ्रं परिवर्तनम् रिक्तपदानि अपि पूरयिष्यन्ते

**हिमसंस्कृतवार्ताः- शिमला।** प्रदेशस्य मुख्यमन्त्रीमहोदयः राष्ट्रीय- अध्यक्षेण खड़गेवर्येण सह मन्त्रणाम् अकरोत्। हिमाचलप्रदेशस्य मन्त्रिमण्डले शीघ्रमेव परिवर्तनं भविष्यति। एतदतिरिच्य कैबिनेट-मन्त्रिणः रिक्तं पदम् अपि शीघ्रं पूरयिष्यते। मुख्यमन्त्री सुखविन्दर सिंह सुक्खुवर्यः बेङ्गलूरु नगरात् प्रत्यागमनानन्तरं अस्मिन् विषये काङ्ग्रेसपक्षस्य राष्ट्रीय-अध्यक्षेण मल्लिकार्जुन खड़गेमहोदयेन सह मन्त्रणाम् अकरोत्। मुख्यमन्त्रिणा काङ्ग्रेससङ्गठनस्य सर्वकारस्य च कार्यप्रणाल्या सह विभिन्न- महत्त्वपूर्ण- राजनैतिक- विकासात्मक- विषयेषु चर्चा कृता। मुख्यमन्त्री सुखविन्दरसिंह सुक्खु महोदयः गुरुवासरे काङ्ग्रेसपक्षस्य राष्ट्रीय-अध्यक्षेण मल्लिकार्जुनखड़गेवर्येण सह दिल्लीनगरे अमिलत्। मुख्यमन्त्रिणा काङ्ग्रेस-अध्यक्षाय राज्यसर्वकारस्य प्राथमिकताः, प्रचलन्ति विकासकार्याणि, सङ्गठनात्मक-गतिविधयः च ज्ञापिताः। उपवेशने राज्यस्य विभिन्न-समस्यासु मन्त्रिभिः सह कृतायाः चर्चायाः सर्वकारस्य योजनानां क्रियान्वयनस्य च विषये अपि विचारविमर्शः अभवत्। अस्मिन् उपवेशने पञ्चायत- निर्वाचनं (चुनाव) अधिकृत्य अपि विस्तरेण चर्चा अभवत्। अस्मिन् समये कथितं यत् राज्ये काङ्ग्रेस- समर्थिताः प्रतिनिधयः पञ्चायतनिर्वाचने बृहत्संख्यायां विजिताः सन्ति, यत् सङ्गठनस्य भूमितले सुदृढतां दर्शयति। अस्मिन् अवसरे मुख्यमन्त्रिणा आगामिवर्षे भवितव्यानां विधानसभा- निर्वाचनानां विषये अपि चर्चा कृता। मुख्यमन्त्रिणा अधुना एव सङ्गठनं सुदृढं कर्तुं निर्वाचनसिद्धतां च आरब्धुं बलं दत्तं, येन पक्षः आगामीषु निर्वाचनेषु उत्तमं प्रदर्शनं कर्तुं शक्नुयात्। राजनैतिकदृष्ट्या एषा मेलनं अत्यन्तं महत्त्वपूर्णं मन्यते।

## कर (टैक्स) विषये पञ्जाबस्य मुख्यमन्त्रिणा सह वार्ता

सीमाक्षेत्रेषु कथित- 'खालसाकर' (टैक्स) ग्रहणं अधिकृत्य मुख्यमन्त्री सुखविन्दर सिंह सुक्खू महोदयः पञ्जाबस्य मुख्यमन्त्रिणा भगवन्त मान वर्येण सह वार्तां कृतवान्। राजस्वमन्त्रिणा जगत् सिंह नेगी महोदयेन उक्तं यत् मुख्यमन्त्री सुक्खु पञ्जाबसर्वकारं अस्मिन् विषये उचितकार्यवाहीं कर्तुं कथितवान्। तौ दूरभाषेण वार्तालापम् अकुरुताम्। नेगीवर्यः अवदत् यत् सः अस्य विषयस्य निन्दां करोति।

# प्रधानमन्त्री नरेन्द्रमोदी गुजरातराज्ये अष्टादश-सहस्राष्टशत-कोटिरूप्यकाधिक मूल्यानां मार्ग-विद्युतः तथा औद्योगिक-विकास-परियोजनानां शुभारम्भं कृतवान्



**हिमसंस्कृतवार्ता।** भारतस्य प्रधानमन्त्री नरेन्द्रमोदी गतदिने गुजरातराज्यस्य सूरतनगरे अष्टादश-सहस्राष्टशत - कोटिरूप्यकाधिक मूल्यानां मार्ग-विद्युतः तथा औद्योगिक-विकास-परियोजनानां शुभारम्भं कृतवान्। सः आदौ हजीराक्षेत्रं गत्वा औद्योगिकाधारभूत संरचना-कार्याणां समीक्षां कृतवान् तथा जनसभामपि सम्बोधितवान्। अनन्तरं प्रधानमन्त्री दमननगरं गच्छति, यत्र प्रायः द्विसहस्र-नवशत-सप्ततिकोटि-रूप्यक-परिमितानां विविध-विकास-परियोजनानाम् उद्घाटनं शिलान्यासं च करोति। एताभिः परियोजनाभिः क्षेत्रस्य विकासः, आजीविका निर्माणानि तथा जनसुविधानां वृद्धयः च भविष्यन्ति।

# मुख्यमन्त्रिणा चिनार-पादपरोपण-अभियानस्य प्रथमचरणस्य कृतः शुभारम्भः



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः 'ओक ओवर शिमला' इत्यत्र विश्वपर्यावरणदिवसस्य पावन- अवसरे 'चिनार- पादपरोपण-अभियानस्य' प्रथमचरणस्य विधिवत् शुभारम्भम् अकरोत्। स्वकीयायै सघनायै छायायै, सौन्दर्याय, पर्यावरणीयमहत्त्वाय च प्रसिद्धः 'चिनार' वृक्षः शिमलानगरस्य जलवायु-कृते अतीव अनुकूलः मन्यते। अस्य प्रयासस्य मुख्योद्देश्यं हरितक्षेत्रस्य विस्तारः, पर्यावरणसंरक्षणं प्रति जनचेतनायाः च प्रवर्धनम् अस्ति। अस्मिन् अवसरे मुख्यमन्त्रिणा वानिकी-पर्यावरणप्रबन्धन- पारिस्थितिकीपर्यटन (ईको टूरिज्म) सम्बद्धानां महत्त्वपूर्णानां प्रकाशनानां विमोचनमपि विहितम्। तेन हिमाचलप्रदेशस्य ७५ ईको- टूरिज्म-स्थलानाम् उपरि आधारितायाः 'कॉफी टेबल बुक' (चित्रमय-पुस्तिकायाः) विमोचनं कृतम्, यस्यां राज्यस्य प्रमुखाणां पर्यावरणीय- पर्यटनस्थलानाम् आकर्षकः परिचयः प्रस्तुतः अस्ति। मुख्यमन्त्रिणा अस्मिन् अवसरे उपस्थितान् जनान् सम्बोधयता कथितं यत् एतानि प्रकाशनानि वनविभागस्य अधिकारिणां, कर्मचारिणां, शोधकर्तृणाम्, नीतिनिर्मातॄणां तथा च पर्यावरणसंरक्षणे रुचिं प्रदर्शयन्तः सर्वेषां जनानां कृते उपयोगीनि सिद्धाः भविष्यन्ति। सः विश्वासं प्रकटितवान् यत् एतानि पुस्तकानि वनप्रबन्धन- जैवविविधतासंरक्षण- ईकोटूरिज्मक्षेत्रेषु ज्ञानस्य जागरूकतायाः च वर्धने प्रमुखां भूमिकां निर्वक्ष्यन्ति। विश्वपर्यावरणदिवसस्य उपलक्षणे मुख्यमन्त्रिणा राजकीय- वरिष्ठ- माध्यमिक- विद्यालयः पोर्टमोर इत्यस्य छात्रेभ्यः 'चिल्ड्रन ऑफ द स्टेट' (राज्यस्य बालकेभ्यः) च पादपाः अपि उपहाररूपेण प्रदत्ताः। अस्मिन् अवसरे विधायकः विनोदसुल्तानपुरी, सुदर्शनबबलू, हरदीपबावा, शिमला-नगरनिगमस्य महापौरः सुरेन्द्रचौहानः, हिमाचलप्रदेशराज्यवन-विकासनिगमस्य उपाध्यक्षः के. एस. खाची, एच. पी. सी. सी. महासचिवः विनोद जिंटा, मुख्यसचिवः के. के. पन्तः, प्रधानमुख्य- अरण्यपालः डा. सञ्जयसूदः अन्ये च गण्याः उपस्थिताः आसन्।

# नशामुक्तये सामूहिकप्रयासाः आवश्यकाः - राज्यपालः



हिमसंस्कृतवार्ताः - शिमला।विश्वपर्यावरणदिवसे, राज्यपालः कवीन्द्रगुप्तः स्वच्छपर्यावरणाय नशामुक्तहिमाचलाय च सामूहिकरूपेण प्रयासान् कर्तुम् आह्वानं विहितवान्। तेन प्रकथितं यत् हिमाचलप्रदेशः स्वच्छपर्यावरणेन शुद्धवायुना च समृद्धं राज्यं वर्तते। सः आगामिसन्ततीनां हिताय प्रदेशस्य प्राकृतिकधरोहरस्य सौन्दर्यस्य च संरक्षणे बलं दत्तवान्। राज्यपालः अवदत् यत् विकासः कदापि पर्यावरणस्य मूल्येन (कीमत पर) न भवेत्। तेन वर्धमानायाः नशायाः समस्यायाः उपरि चिन्ता प्रकटीकृता, उक्तं च यत् युनः नशापाशात् रक्षितुम् आरक्षकदलं (पुलिस) प्रशंसनीयं कार्यं करोति। मादकद्रव्यस्य विरुद्ध सङ्घर्षः केवलं सर्वकारस्य नास्ति, अपितु समाजस्य प्रत्येकवर्गस्य सामूहिकम् उत्तरदायित्वं वर्तते। यदि सर्वे नागरिकाः मिलित्वा प्रयासान् कुर्युः, तर्हि हिमाचलप्रदेशः पूर्णतः नशामुक्तराज्यं भवितुं शक्नोति। स्वच्छतायाः प्रारम्भः गृहात् भवेत्, एतच्च दैनिकजीवनस्य अभ्यासः करणीयः। स्वच्छजीवनशैल्याः ग्रहणेन स्वस्थ-शाश्वत-समाजस्य निर्माणं सम्भवति। राज्यपालः सर्वान् प्रतिभागिनः स्वच्छता-पर्यावरणसंरक्षण-नशामुक्तजीवनं प्रति समर्पिताः भवितुं शपथं कारितवान्। सः 'हरित हिमाचल एवं चिट्टा-मुक्त हिमाचल' इति 'कैंपेन वॉल' (अभियान-भित्तिकायाम्) स्वहस्ताक्षरं कृत्वा द्वाभ्याम् अभियानाभ्यां प्रति स्वां प्रतिबद्धतां पुनः प्राकटयत्। अस्मिन् मङ्गलावसरे महापौरः सुरेन्द्रचौहानः, आरक्षकमहानिदेशकः (DGP) अशोकतिवारी, पर्यावरण-विज्ञान-प्रौद्योगिकी-जलवायुपरिवर्तनविभागस्य सचिवः सुशीलकुमारसिङ्गला, जनगणना-सञ्चालन-निदेशिका दीपशिखाशर्मा, वरिष्ठाः अधिकारिणः च उपस्थिताः आसन्।

# मादकद्रव्यव्यापारे संलिप्तानां १२३ शासकीय- कर्मचारिणां विरुद्धं कार्यविधिः, १७४ 'चिट्टा' तस्कराः कारागारं प्रेषिताः- मुख्यमन्त्री सुक्खुः



हिमसंस्कृतवार्ताः- शिमला। मुख्यमंत्री सुखविन्द्रसिंहसुक्खुः शुक्रवासरे रिज- प्राङ्गणे आयोजिते विश्वपर्यावरणदिवसस्य अवसरे सर्ववर्गेभ्यः पर्यावरणसंरक्षणं 'जनान्दोलनम्' कर्तुम् आह्वानं कृतवान्। तेन प्रकथितं यत् स्वच्छं जलं, शुद्धा वायुः, वनानि, नद्यश्च इति प्राकृतिकधरोहराः अस्माकं जीवनस्य आधाराः सन्ति, अतः प्रकृतेः एतान् अमूल्योपहारान् सुरक्षितं स्थापयितुम् अस्माकं सर्वेषां सामूहिकम् उत्तरदायित्वं वर्तते। मुख्यमन्त्रिणा प्रतिपादितं यत् हिमाचलप्रदेशः सम्पूर्णोत्तरभारताय स्वच्छजलं शुद्धां वायुं च उपकल्पयितुं प्रमुखां भूमिकां वहति, येन कारणेन एषः 'लंग्स ऑफ नॉर्थ इंडिया' (उत्तरभारतस्य फुफ्फुसः) इति उच्यते। सः अवदत् यत् प्रदेशस्य पक्षतः देशाय प्रतिवर्षं प्रायः ९० सहस्रकोटिरूप्यकाणां पारिस्थितिकी-सेवाः (इकोलॉजिकल सर्विसेज) प्रदीयन्ते, परन्तु अस्य विनिमये हिमलाचलाय केन्द्रसर्वकारतः किमपि प्रतिफलं न प्राप्यते।

## पर्यावरणसंरक्षणम् अद्यतनसमयस्य महती आवश्यकता- मुख्यमन्त्री

तेन कथितं यत् वर्धमानं वैश्विकतापमानम् (ग्लोबल वार्मिंग), परिवर्तमानम् ऋतुचक्रं, प्राकृतिकविपद् च अस्मभ्यं स्पष्टं सङ्केतं यच्छन्ति यत् पर्यावरणसंरक्षणम् अद्यतनसमयस्य महती आवश्यकता अस्ति। मुख्यमन्त्रिणा संसूचितं यत् वर्ष २०२३ तथा २०२५ मध्ये प्रदेशेन इतिहासस्य भीषणतमाः प्राकृतिकविपदः सम्मुखीकृताः, यैः सहस्रशः परिवाराः प्रभाविताः अभवन्, जनधनस्य च भूरि हानिः संजाता। सर्वकारेण प्रभावितानां परिवाराणां व्रणेषु लेपनं कृतं, प्रत्यकं च कठिने समये सा दृढतया तैः साकम् अतिष्ठत्। वर्ष २०३० पर्यन्तं वनावरणं वर्धयित्वा ३२ प्रतिशत् कर्तुं लक्ष्यं निर्धारितम् अस्ति। 'मुख्यमंत्री वन विस्तार योजना' इत्यस्याः अन्तर्गतं बञ्जरपर्वताः हरिद्वर्णाः क्रियन्ते।

## सर्वकारः स्वकीयानां हितानां कृते सङ्घर्षं करोति- सुक्खुः

सुक्खुमहोदयः अवदत् यत् वर्तमानः राज्यसर्वकारः प्रदेशस्य हितानि सर्वोपरि निधाय स्वकीयानाम् अधिकाराणां कृते सङ्घर्षं करोति, नीति- आयोगस्य आगामिनि उपवेशने एते विषयाः केन्द्रसर्वकारस्य सम्मुखं प्रमुखाधारेण उत्थापयिष्यन्ते। प्रदेशे 'ई- वाहनानि' (इलेक्ट्रिक व्हीकल्स) प्रोत्साह्यन्ते तथा च शीघ्रमेव हिमाचलपथपरिवहननिगमस्य गणे २९७ नूतनाः ई- बसयानानि सम्मेलयिष्यन्ते। चीड़- वृक्षाणां शुष्कपत्राणाम्, अन्यबायोमासतः 'बायोचार' उत्पादनार्थं राज्ये द्वौ बायोचार-संयन्त्रौ संस्थाप्येते।

## पञ्चायतस्तरं यावत् 'चिट्टा' तस्कराणां नशाव्यापारिणां च संजाता परिचयः

मुख्यमन्त्रिणा प्रतिपादितं यत् राज्यसर्वकारेण 'चिट्टा' इत्यादिमादकद्रव्याणां विरुद्धं जन- आन्दोलनं प्रारब्धम्। हिमाचलम् देशस्य प्रथमं राज्यं वर्तते, यत्र पञ्चायतस्तरं यावत् चिट्टातस्कराणां मादकद्रव्यकारोबारीणां च संचिह्नीकरणं विहितम्। सः कठोरशब्देषु अवदत् यत् यदि चिट्टा-माफिया न परिष्करोति, तर्हि तस्य विरुद्धं कठोरतमा कार्यविधिः भविष्यति। सर्वकारेण 'पीटी-एनडीपीएस' अधिनियमः प्रभावशालिरूपेण प्रवर्तितः, यस्य अन्तर्गतं १७४ चिट्टातस्कराः कारागारं प्रेषिताः सन्ति, ५१ कोटिरूप्यकाणां सम्पत्तयः गृहीताः। अधुना यावत् ७६ ईदृश्यः सम्पत्तयः च संचिह्निताः, १७ प्रकरणेषु च नशामाफियानां सम्पत्तयः विनष्टाः कृताः।

## नशाव्यापारे संलिप्ताः ३१ कर्मचारिणः सेवातः निष्कासिताः

मुख्यमन्त्रिणा स्पष्टीकृतं यत् नशायाः अवैधव्यापारे संलिप्तः कश्चपि जनः न रक्षिष्यते, सः कियान् अपि प्रभावशाली किमर्थं न भवेत्। सम्प्रति यावत् नशाव्यापारे संलिप्तानां १२३ शासकीयकर्मचारिणां विरुद्धं कार्यविधयः कृताः। एतेषु २१ आरक्षक- कर्मचारिभिः (पुलिस कर्मियों) सह ३१ अन्ये कर्मचारिणः सेवातः निष्कासिताः (बर्खास्त) सन्ति। मुख्यमन्त्रिणा जनसमूहः 'एन्टी-चिट्टा' (चिट्टा- निषेध) अभियानाय पर्यावरणसंरक्षणाय च शपथं कारितः।

## मुख्यमन्त्रिणा प्रदत्ताः पर्यावरण- उत्कृष्टता- पुरस्काराः

मुख्यमन्त्रिणा वर्ष २०२५-२६ कृते पर्यावरणसंरक्षणक्षेत्रे उत्कृष्टकार्यं कृतवद्भिः विभिन्नेभ्यः संस्थानेभ्यः व्यक्तिभ्यश्च 'पर्यावरण उत्कृष्टता पुरस्काराः' प्रदत्ताः। प्रथमपुरस्काररूपेण ५० सहस्ररूप्यकाणि, स्मृतिचिह्नं, प्रशस्तिपत्रं च तथा द्वितीयपुरस्काररूपेण २५ सहस्ररूप्यकाणि, स्मृतिचिह्नं, प्रशस्तिपत्रं च प्रदत्तम्।

> विद्यालयवर्गे प्रथमः- राजकीय वरिष्ठ माध्यमिक विद्यालय भलेठ (सुजानपुरम् टीहरा, हमीरपुरम्)।

> विद्यालयवर्गे द्वितीयः- राजकीय वरिष्ठ माध्यमिक विद्यालय सरोग (शिमला) तथा पाइनग्रोव स्कूल कसौली (सोलन)।> शिक्षणसंस्थानवर्गे प्रथमः- सेन्ट बीड्स कॉलेज नवबहार (शिमला)।

> चिकित्सालयवर्गे द्वितीयः- अखिल भारतीय आयुर्विज्ञान संस्थानम् (AIIMS) बिलासपुरम्।

> व्यक्तिगतवर्गे द्वितीयः- ब्लॉक फॉरेस्ट ऑफिसर संतोषकुमारठाकुरः (रिकांगपिओ)।

> उद्योगवर्गे प्रथमः- नेस्ले इण्डिया लिमिटेड (ऊना)।

> उद्योगवर्गे द्वितीयः:- इण्डोरामा इण्डिया प्राइवेट लिमिटेड (बद्दी)।

# मातृस्वरूपायाः पृथिव्याः स्वस्थ- समृद्ध- हरित- अस्तित्वाय पर्यावरणसंरक्षणम् आवश्यकम्- डा. अतुलवैद्यः

हिमसंस्कृतवार्ताः- डॉ रेणुकाबोकारे, नागपुरम्।कविकुलगुरु- कालिदास- संस्कृत- विश्वविद्यालयः, रामटेकः इत्यत्र विश्व- पर्यावरण- दिवसस्य अवसरे माननीयानां कुलगुरूणां डा. अतुलवैद्यमहोदयानां करकमलैः विश्वविद्यालयपरिसरे बकुलपादपस्य (मौलसिरी) रोपणं विहितम्। अस्मिन् अवसरे कुलगुरवः डॉ. अतुलवैद्यमहोदयाः अवदन् यत्– "पर्यावरणसंरक्षणम् अद्यतनयुगस्य महती आवश्यकता वर्तते। वयं स्वकीयेन पर्यावरणानुकूल- आचरणेन प्रकृतेः रक्षां कुर्याम, न्यूनतम् एतच्च निश्चितं कुर्याम यत् अस्माकं कारणतः पर्यावरणस्य कापि हानिः न भवेत्। अद्य यदा भारतं भीषणतापस्य उष्मणा ज्वलन् अस्ति, तदा शीतलां छायां प्रदातॄणां वृक्षाणां महत्त्वम्, सघनानां वनानाम् अस्तित्वं, जलसङ्कटस्य विभीषिका च अधिकतीव्रतया अनुभूयते। अत एवोक्तम्– 'शतपुत्रसमो द्रुमः' अर्थात् एकः वृक्षः शतपुत्राणां सदृशः भवति। 'एकः पादपः मातुः नाम्नि' (एक पेड़ माँ के नाम) इति अभियानस्य अन्तर्गतं वयं केवलं वृक्षारोपणमेव न कुर्याम, अपितु तेषां संरक्षणस्य सङ्कल्पमपि गृह्णीयाम। जन्मदात्र्याः मातुः नाम्नि रोपितः वृक्षः अस्माकं मातृस्वरूपायाः पृथिव्याः स्वस्थ- समृद्ध- हरित- अस्तित्वाय परमम् आवश्यकः अस्ति। विश्व- पर्यावरणदिवसस्य पावन- अवसरे प्रत्येकजनः स्वमातृस्वरूपायाः पृथिव्याः कृते न्यूनतम् एतादृशं योगदानं प्रदातुं सङ्कल्पं अवश्यमेव स्वीकुर्यात्।"अस्मिन् मङ्गले अवसरे सौ. शिल्पावैद्या, योगतज्ञा सौ. ज्योतितुंडुलवार, माननीया अधिष्ठात्री प्रो. कविताहोले, प्रो. कलापिनी अगस्ती, प्रो. प्रसादगोखले, कुलसचिवः डॉ. रोशनअलोने, ग्रन्थपालः डॉ. दीपककापड़े, जनसम्पर्काधिकारिणी डॉ. रेणुकाबोकारे, उद्यानप्रमुखः सुरक्षाधिकारी च श्रीप्रवीणकलम्बे महोदयाः सहित अनेके कर्मयोगिनः उपस्थिताः आसन्।



# एल.एन.एम.यू. संस्थाने पर्यावरणजागरूकतासङ्गोष्ठी आयोजिता

## विश्वपर्यावरणदिवसे वृक्षारोपणम्, पर्यावरणसंरक्षणविषये च वक्तारः स्वविचारान् प्रकटितवन्तः



**हिमसंस्कृतवार्ता, विश्वमोहन झा दरभङ्गा, ५ जून।** विश्वपर्यावरणदिवसस्य (२०२६) अवसरे ललितनारायणमिथिलाविश्वविद्यालयस्य भूगोलविभागस्य स्नातकोत्तर-एनएसएस-इकाइतः च संयुक्तावधाने स्नातकोत्तरभूगोलविभागे वृक्षारोपणस्य पर्यावरणजागरूकतासङ्गोष्ठ्याः च आयोजनं कृतम्। कार्यक्रमस्य अध्यक्षता विभागाध्यक्षा डॉ. रश्मिशिखा कृतवती, यदा च सामाजिकविज्ञानसङ्कायाध्यक्षः प्रो. ध्रुवकुमारः मुख्यअतिथिपेण, विश्वविद्यालयस्य एनएसएस-समन्वयकः डॉ. आर.एन. चौरसिया च मुख्यवक्तृरूपेण उपस्थिताः आसन्। कार्यक्रमस्य शुभारम्भः अतिथिभिः पादपारोपणेन कृतः। अस्मिन् अवसरे प्रो. ध्रुवकुमारः अवदत् यत् प्राकृतिकसंसाधनानाम् अन्धकुपेन (अमर्यादित) दोहनेन पर्यावरणं असन्तुलितं भवति, येन जलवायुपरिवर्तनं, वैश्विकतापमानवृद्धिः (ग्लोबल वार्मिंग), प्रदूषणं च इत्यादयः समस्याः वर्धन्ते। अपरपक्षे डॉ. आर.एन. चौरसिया युवानः प्रति हरित-स्वच्छभारतस्य निर्माणे सक्रिया भूमिकां निर्वोढुम् आह्वानं कृतवान्। अध्यक्षीयभाषणे डॉ. रश्मिशिखा भारतीयपरम्परायां प्रकृतेः मानवस्य च गभीरसम्बन्धस्य उपरि प्रकाशं प्रक्षिप्तवती। स्वागतभाषणं डॉ. मनुराजशर्मा कृतवान् तथा च धन्यवादज्ञापनं डॉ. सुनीलकुमारः कृतवान्। अस्मिन् कार्यक्रमे शिक्षकाः, शोधार्थिनः, छात्राः च सम्भूय पञ्चाशत् (५०) तः अधिकाः जनाः उपस्थिताः आसन्।

# नीतीश मिश्रः एल.एन.एम.आई. संस्थानस्य कार्यवाहक-अध्यक्षपदं गृहीतवान्




**हिमसंस्कृतवार्ता, राघव नाथ झा।** बिहारसर्वकारस्य नगरविकास-आवास-सूचनाप्रौद्योगिकीमन्त्री श्रीनीतीशमिश्रः शुक्रवासरे ललितनारायणमिश्र-आर्थिकविकास-सामाजिकपरिवर्तनसंस्थानस्य (एल.एन.एम.आई., पटना) कार्यवाहक-अध्यक्षरूपेण कार्यभारं स्वीकृतवान्।अस्मिन् अवसरे संस्थानस्य निदेशिका डॉ. एन. विजयलक्ष्मी, प्राध्यापिका डॉ. चन्द्रा सिंह च तस्य स्वागतं कृतवत्यौ। अस्मिन् कार्यक्रमे संस्थानस्य शिक्षकाः, अधिकारिणः, कर्मचारिणः च उपस्थिताः आसन्।श्रीनीतीशमिश्रः मुख्यमन्त्रिणम् प्रति कृतज्ञतां ज्ञापयन् अवदत् यत् एल.एन.एम.आई. संस्थानेन सह तस्य गभीरः भावनात्मकः सम्बन्धः अस्ति। संस्थानस्य गौरवशालिनीं परम्परां अग्रे नेतुं सः पूर्णप्रतिबद्धतया कार्यं करिष्यति। सः विशेषतः बलं दत्तवान् यत् छात्रान् उद्योगिनः (रोजगारदातारः) विधातुम्, कौशलविकासं, नवीनताम् (नवाचारं), आधुनिकतकनीकाधारितशिक्षां च प्रवर्धयितुं विशेषः प्रयासः करिष्यते।तेन उक्तं यत् एल.एन.एम.आई. राज्यस्य आर्थिक-सामाजिकविकासे ज्ञान-शोध-नीतिनिर्माणक्षेत्रेषु प्रमुखां भूमिकां निर्वहति। संस्थानं नवीनशिखरं नेतुं तथा च गुणवत्तापूर्णशिक्षां शोधकार्यं च सुदृढं कर्तुं सर्वविधं साहाय्यं प्रदास्यते।
विश्वपर्यावरणदिवसस्य अवसरे श्रीमिश्रः संस्थानप्राङ्गणे वृक्षारोपणमपि कृतवान्, पर्यावरणसंरक्षणं च सर्वेषां सामूहिकं उत्तरदायित्वं घोषितवान्।



# "लौकिकन्यायकोशः"

## "अङ्कोलबीजन्यायः"

अङ्कोलवृक्षस्य बीजानि अधः पतितानि मृगनक्षत्रस्य मेघगर्जनाकाले पुनः गत्वा वृक्षेण लग्नानि भवन्ति। अनुकूलपरिस्थितिः प्राप्ता चेत् कोऽपि जनः किं वा किमपि वस्तु मूलावस्थां प्राप्तुं शक्नोति। तस्यः अधः पतने जाते अपि पूर्वावस्थां प्राप्तुं शक्या इत्यभिप्रायेण अस्य न्यायस्य प्रयोगः भवति।

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**



**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
अद्य एका विचित्रा वार्ता श्रुता। एकेन सङ्गणक-तन्त्रज्ञेन सप्तविंशति- लक्षरूप्यकाणां वेतनं त्यक्त्वा न्यूनवेतनयुक्ता पूर्वतनी जीविका इष्टा। सः मानसिक-शान्त्यै एतं निर्णयं कृतवान् अस्ति।

**काव्या-** सत्यम्, धनम् एव सर्वस्वं न भवति, शान्तिः अपि आवश्यकी। अन्या एका दुःखदा वार्ता गुरुग्रामतः प्राप्ता। तत्र एकेन मध्यस्थेन भाटकधनं स्वयमेव खादितम्। तस्मात् कारणात् गृहस्वामिना रात्रौ एव भाटकिनः निष्कासिताः।

**नन्दिनी-** एतत् तु अतीव अमानुषिकं कार्यं कृतं मध्यस्थेन, निर्दोषाः पीडिताः। परन्तु छत्तीसगढ-राज्यस्य धम्तरीग्रामे जनैः एकः उत्तमः मार्गः अन्विष्टः। उद्योगार्थं ग्रामान्तर-प्रयाणस्य या प्रवृत्तिः अभूत्, सा स्वप्रयत्नेन निर्मित-जलसेचन-यन्त्रेण रुद्धा।

**काव्या-** अहो! ग्रामवासिनां स्वावलम्बनं प्रशंसनीयम् अस्ति। अन्ते एका मधुरा वार्ता। राञ्ची-प्रान्तस्य एकस्मिन् ग्रामे 'मम प्रियम्' इति नाम्ना किञ्चन इटाली-देशीयम् उपहारगृहं स्थापितम्। तत्र ग्राम्यपरिवेशे जनैः इटाली- देशीयस्य पिष्टक-विशेषस्य आस्वादः लब्धः।

**नन्दिनी-** एतत् तु अतीव विस्मयकारकम्! ग्रामीणेषु अपि विदेशीय-भोजनस्य रुचिः वर्धिता। अद्यतनः कार्यक्रमः अत्रैव समाप्यते। धन्यवादः।

# संस्कृतविश्वविद्यालये अभवत् वृक्षारोपणम्

## विश्वपर्यावरणदिवसे कुलपतेः नेतृत्वे सञ्चालितम् अभियानम्




हिमसंस्कृतवार्ता, दरभङ्गा, ५ जून। विश्वपर्यावरणदिवसस्य अवसरे कामेश्वरसिंहदरभङ्गा-संस्कृतविश्वविद्यालयमुख्यालये कुलपतेः प्रो. लक्ष्मीनिवासपाण्डेयमहोदयस्य नेतृत्वे शुक्रवासरे वृक्षारोपणं कृतम्। राष्ट्रीयसेवाोजनायाः (NSS) पर्यावरणमञ्चस्य च संयुक्तावधाने स्नातकोत्तरविभाग-प्राङ्गणेन सह विविधेषु स्थानेषु पादपाः रोपिताः।
अस्मिन् अवसरे कुलपतिः प्रो. पाण्डेयमहोदयः अवदत् यत् वृक्षाणाम् उपयोगिता मानवसभ्यतायाः आरम्भादेव अस्ति, शास्त्रेषु अपि एतेषां महत्त्वस्य अनेकाः प्रमाणाः प्राप्यन्ते। सः जनान् प्रार्थयन् अकथयत् यत् विशेषोत्सवाणाम् अतिरिक्तम् अपि पित्रोः प्रियजनानां च स्मृतौ वृक्षारोपणस्य परम्परा विकसिता करणीया।
अस्मिन् कार्यक्रमे डीन प्रो. पुरेन्द्रवारिकः, एनएसएस-समन्वयकः डॉ. सुधीरकुमारः, कुलसचिवः डॉ.दिनेशझा, डॉ. पवनझा, डॉ. नवीनझा, डॉ. सुनीलकुमारझा, डॉ.उमेशझा, डॉ. धीरजपाण्डेयः, डॉ. सन्तोषपासवानः, डॉ. रामसेवकझा, डॉ. नरोत्तममिश्रः, गोपालउपाध्यायः च इत्यादयः अनेके अधिकारिणः कर्मचारिणः च उपस्थिताः आसन्।

# धर्मशालां प्राप्तः भारतस्य मुख्यनिर्वाचनायुक्तः ज्ञानेशकुमारः,

# गगल-विमानपत्तने कृतवान् अवतरणम्



**हिमसंस्कृतवार्ताः - धर्मशाला।**
भारतस्य मुख्यनिर्वाचनायुक्तः ज्ञानेशकुमारः 'इन्डिगो एयरलाइन्स्' इति विमानेन गगल-विमानापत्तने स्वपरिवारेण साकं प्राप्तवान्। भारतनिर्वाचन-आयोगस्य माननीयः मुख्यनिर्वाचनायुक्तः ज्ञानेशकुमारः काङ्गड़ा-चम्बा-जनपदयोः चतुर्दिवसीय-प्रवासे वर्तते। तस्य एषः प्रवासः ०५ जून २०२६ तः ०८ जून २०२६ पर्यन्तं निर्धारितः अस्ति। अस्मिन् अन्तराले सः निर्वाचनसम्बद्धानां विभिन्नानां विधीनां समीक्षां कर्तुं सहैव निर्वाचनकार्याधिकारिभिः, बी.एल.ओ. (BLO), बी.एल.ओ.-पर्यवेक्षकैः तथा अन्यैः सम्बद्धाधिकारिभिः साकं संवादं करोति।स्वप्रवासस्य प्रथमे दिने माननीयः मुख्यनिर्वाचनायुक्तः 'होटल हयात' (धर्मकोट, धर्मशाला) इत्यत्र आयोजिते एकस्मिन् संवादकार्यक्रमे मतदानकेन्द्रस्तरीयाधिकारिभिः (बीएलओ), बी.एल.ओ.-पर्यवेक्षकैः तथा निर्वाचनकर्मचारिभिः सह विस्तृतां चर्चाम् अकरोत्। अस्मिन्नवसरे हिमाचलप्रदेशस्य मुख्यनिर्वाचनाधिकारिणी नन्दिता-गुप्ता, अतिरिक्त-मुख्यनिर्वाचनाधिकारी नीरजचांदला, अतिरिक्त-मुख्यनिर्वाचनाधिकारी मुरारीलालः, उप-मुख्यनिर्वाचनाधिकारी दोरजेठाकुरः तथा जनपद-उपमण्डलस्तरीय-निर्वाचनाधिकारिणः उपस्थिताः आसन्। स्वकीय-सम्बोधने माननीयः मुख्यनिर्वाचनायुक्तः बी.एल.ओ. तथा बी.एल.ओ.-पर्यवेक्षकाणां भूमिकायाः भृशं प्रशंसां कुर्वन् तान् निर्वाचनतन्त्रस्य आधारशिला इति अवोचत्। तेन प्रतिपादितं यत् मतदातासूच्याः शुद्धतां, विश्वसनीयतां, समावेशितां च निश्चितं कर्तुं बी.एल.ओ.-महोदयानां भूमिका अतीव महत्त्वपूर्णा अस्ति। मुख्यनिर्वाचनायुक्तः 'विशेष गहन पुनरीक्षण' (SIR) इत्यस्य महत्त्वे बलं दत्त्वा निर्देशं दत्तवान् यत् अभियानकाले प्रत्येकं पात्रनागरिकं यावत् प्राप्तिः (पहुंच) निश्चिता करणीया। सः विशेषरूपेण तेषां पात्रनागरिकाणां संचिहीकरणे (पहचान) पञ्जीकरणे च ध्यानं केन्द्रितुम् अकथयत्, येषां नामानि केनापि कारणेन मतदातासूच्यां अङ्कितानि न अभवन्। तेन संसूचितं यत् एतत् सुनिश्चितं भवेत् यत् कश्चपि पात्रः मतदाता सूच्याः वञ्चितः न स्यात्, नापि कापि अपात्रा प्रविष्टिः सूच्यां सम्मीलिता भवेत्।
संवादकाले बी.एल.ओ.-द्वारा क्षेत्रस्तरे सम्मुखीक्रियमाणानां विभिन्नानां आह्वानानां, विशेषतः नूतनमतदातृणां संचिहीकरणस्य, प्रवासिमतदातृणां प्रमाणीकरणस्य (सत्यापन) तथा मतदातासूच्याः अद्यतनीकरणस्य (अपडेट) विषयेषु विमर्शाः कृताः। माननीयः मुख्यनिर्वाचनायुक्तः निर्वाचन-आयोगस्य पक्षतः पूर्णसहयोगस्य आश्वासनं दत्तवान् तथा च सम्बद्धाधिकारिणः आवश्यकाय प्रशिक्षाय व्यवस्थागतसहायतायै च निर्देशितवान्। तेन निर्वाचनकार्ये प्रगत-सूचनाप्रौद्योगिक्याः (IT आधारित प्रणालियों) प्रभावशालि-उपयोगेऽपि बलं दत्तम्, येन पारदर्शिता, कार्यकुशलता, समयबद्धता च निश्चिता भवितुं शक्नुयात्। कार्यक्रमस्य अन्ते माननीयः मुख्यनिर्वाचनायुक्तः निर्वाचनतन्त्रस्य कार्येषु सन्तोषं प्रकटयन् सर्वान् अधिकारिणः कर्मचारिणश्च निष्पक्षां, पारदर्शिनीं, समावेशिनीं च निर्वाचनप्रक्रियां सुनिश्चितं कर्तुं पूर्णसमर्पणेन प्रतिबद्धतया च कार्यं कर्तुम् आह्वानं कृतवान्। अतः परं मुख्यनिर्वाचनायुक्तः ज्ञानेशकुमारः मैक्लोडगञ्ज-स्थिते नामग्याल-मठं, 'सेंट जॉन' इति चर्च-भवनं, नॉरबुलिंगका-मठं च अभ्रमत्।

# विजयकुमारसिन्हा खरीफमहाभियानस्य (२०२६) शुभारम्भं कृतवान्




## मृत्तिकां रक्षत, कृषिं रक्षत, कृषकं रक्षत; सङ्गणकीयकृषौ (अङ्कीयकृषौ) प्राकृतिककृषौ च भविष्यति विशेषः बलः

**हिमसंस्कृतवार्ता, राघव नाथ झा।**
बिहारराज्यस्य कृषिमन्त्री श्रीविजयकुमारसिन्हा शारदीय-(खरीफ)-महाभियानस्य २०२६ इत्यस्य शुभारम्भावसरे आयोजितां राज्यस्तरीयां कार्यशालां सम्बोधयन् अवदत् यत् इदं अभियानं कृषकाणां समृद्धेः, आत्मनिर्भरतायाः, विकसितबिहारनिर्माणस्य च एकं जन-आन्दोलनम् अस्ति। तेन उक्तं यत् कृषिविभागः सम्पूर्णे राज्ये "क्षेत्ररक्षण-अभियानम्" सञ्चाल्य मृत्तिकापरीक्षणम्, सन्तुलितोर्वरकप्रयोगम्, प्राकृतिककृषिम्, जलसंरक्षणं, शस्यविविधीकरणं च प्रवर्धयिष्यति। अनेन सह एव आगामिमासात् "कृषकजनकल्याणसंवादः" इति कार्यक्रमस्य पुनः शुभारम्भः भविष्यति।
श्रीविजयकुमारसिन्हा प्राकृतिककृषेः संवर्धने बलं दत्त्वा अवदत् यत् मृत्तिकायाः, जलस्य, कृषकस्य च सुरक्षा एव विकसितबिहारस्य आधारशिला अस्ति। सः कृषकान् आधुनिकतन्त्रज्ञानप्रविध्या सह संयोजयितुम् "कृषक-सङ्गणकीयसाक्षरता-अभियानस्य" आरम्भस्य घोषणामपि कृतवान्। तेन प्रतिपादितं यत् व्योमयान-यन्त्राणाम् (पत्ररथानाम्), कृत्रिमप्रज्ञायाः, दूरसंवेदनप्रविधेः, अङ्कीयमञ्चानां च माध्यमेन बिहारस्य कृषिः अधिका आधुनिका, लाभप्रदा, स्थिरा च विधास्यते। अपि च सः अधिकारिणः आदिष्टवान् यत् योजनानां लाभः साक्षात् क्षेत्रेषु प्राप्नुयात्, कृषकेभ्यः च समये आवश्यकाः सुविधाः उपलब्धाः भवेयुः।

